(1) पेज = २ (९,१०) 24×11.5×0.1 c.m

विषय - योग

संवेदता यस्तत्र व्यवहारः प्रवर्त्तते॥१०६॥

... ...

पिंगलानामयानाड़ीदक्षभागेव्यवस्थिता॥३२६॥

Note→ पेज फटे हुए है।

(2) पेज = २ (७,८) २९×13×0.1 c.m

विषय - तन्त्र-मन्त्र

स्तंभनंतं हुलीमूलं तोयेनदात्तव्यंतंडुलंवारिणा

... ...

विद्वेषं जायतेसत्वं सिद्धि योगमुदाहृत १८

Note→ पेज फटे हुए है।

(3) पेज = 1 30×13.5×0.1 c.m.

मल्पास्तीतितयातथाविधस्यपुरुषस्य

... ...

त्वंजयदक्षायैनटैटसिजगतालाका

Note→ पेज फटे हुए है।

④ पेज = 1 = 29×14×0.1 cm

तत्कसक्षयमेतिमिश्रिवत गन्धर्वकन्याद्यधिसा

....

सुविधिद्यामूर्द्धनाजुच २६ नानागानाविनोदे

Note → पेज फटा हुआ है।

संवेद्य यस्तत्र व्यवहारः प्रवर्त्तते ॥ २०६ ॥ जानाति यः सर्वमिदं स योगी नात्र संशयः ॥ ब्रह्मांड
संज्ञिके देहे यथादेशं व्यवस्थितः ॥ २०७ ॥ मेरुशृंगे सुधारश्मि र्द्विरष्टकलया युतः ॥ २०७ ॥ वर्त्त
तेहर्निशं सोपि सुधां वर्षत्यधोमुखः ॥ ततो मृतं द्विधा भूतं याति सूक्ष्मं यथा विधौ ॥ २०८ ॥ इडा मा
र्गेण पुष्ट्यर्थं याति मंदाकिनी जलं ॥ पुष्णाति सकलं देहमिडामार्गेण निश्चलं ॥ २०९ ॥ एष पीयूष
रश्मिर्हि वामपार्श्वे व्यवस्थितः ॥ अपरः शुद्धदुग्धाभो हठात्कर्षति मंडलः ॥ २१० ॥ वंध्यामार्गेण
सृष्ट्यर्थं मेरोः संयाति चंद्रमाः ॥ मेरुमूले स्थितः सूर्यः कलाद्वादशसंयुतः ॥ २११ ॥ दक्षिणे पथि र
श्मिभिर्वहत्यूर्ध्वं [illegible] सूर्यतिः ॥ पीयूषरश्मिनिर्यासं धातुश्च ग्रसति ध्रुवं ॥ २१२ ॥ समीरमंडले

सूर्यो भ्रमते सर्वविग्रहे ॥ एषा सूर्यं परा मूर्त्तिर्नराणां दक्षिणापथि ॥ ११३ ॥ वहते लग्नयोगेन
सृष्टिसंहारकारकः ॥ सार्द्धलक्षत्रयं नाड्यः संति देहांतरे नृणां ॥ ११४ ॥ प्रधानभूता नाड्यस्ता
नाश्च संति चतुर्दश ॥ सुषुम्नेला पिंगला च गांधारी हस्तिजिह्विका ॥ ११५ ॥ गुह्या सरस्वती-पूषा
शंखिनी च पयस्विनी ॥ वारुणालंबुषा चैव विश्वोदरी च यशस्विनी ॥ ११६ ॥ एतासु तिस्रो मुख्याः
स्युः पिंगलैला स्वसंधिका ॥ नाड्यस्ता अधोवदनाः पद्मपत्रनिभाः स्थिताः ॥ ११७ ॥ पृष्ठवंश
समाश्रित्य सोमसूर्याग्निरूपिणी ॥ तासां मध्यगता नाडी चित्रा सा मम वल्लभा ॥ ११८ ॥ ब्रह्मरंध्रं च
तत्रैव सुषुम्ना सूक्ष्मतरा शुभा ॥ पंचवर्णोज्ज्वला सूक्ष्मा सुषुम्नामध्यचारिणी ॥ ११९ ॥ देहस्योपा

ड्डापिंगलायोर्योगः सुषुम्णायां भवेत्खलु ॥१२७॥ षट्सु स्थानेषु षट्चक्रं षट्पद्मं योगिनो विदुः
पंचस्थानं सुषुम्णायां नामानि सुबहूनि च ॥१२८॥ प्रयोजनवशात्तानि ज्ञातव्यानीह शास्त्रके
अन्या या सूक्ष्मपरा नाडी मूलाधारात्समुत्थिता ॥१२९॥ रसनां मेढ्रं नयनं पादांगुष्ठं च श्रोत्रकं ॥ दक्षने
त्रं गुष्टकर्णौ सर्वांगं पायुकुक्षिकं ॥१३०॥ लब्ध्वा निवर्त्तते तावैवायुदेशसमुद्भवा ॥ एताभ्य एव नाडी

भ्यः शाखोपशाखतः क्रमात् ॥१३१॥ सार्द्धलक्षत्रयं जातं यथाभागव्यवस्थितं ॥ एता भोगवहा ना
ड्यो वायुसंचारदक्षकाः ॥१३२॥ ओतप्रोताः सुसंव्याप्य तिष्ठंत्यस्मिन्कलेवरे ॥ सूर्यमंडलमध्यस्थः कला
द्वादशसंयुतः ॥१३३॥ वस्तिदेशे ज्वलद्वह्निर्वर्त्तते चान्नपाचकः ॥ वैश्वानराग्निरेष मम तेजोंश

तौ

धिरूपा सा सुषुम्ना भिन्नरूपिणी॥ दिव्यमार्गमिदं प्रोक्तममृतानंदकारकं॥१२०॥ ध्यानमात्रे
णयोगींद्रो दुरितौघं विनाशयेत्॥ आपानाद्व्यंगुलादूर्द्ध्वं मेढ्राधो द्व्यंगुलात्परे॥१२१॥ चतुरंगुल
विस्तारमाधारं वर्त्तते समं॥ तस्मिन्नाधारपाथोजे कर्णिकायां सुशोभना॥१२२॥ त्रिकोणा वर्त्तते
योनिः सर्वतंत्रेषु गोपिता॥ तत्र विद्युल्लताकारा कुंडली परदेवता॥१२३॥ सार्द्धप्रकारा कुटिला
सुषुम्नामगसन्निभा॥ जगत्संसृष्टिरूपा सा निर्माणे सततोद्यता॥१२४॥ वाचामवाच्या वाग्देवी सदा
देवैर्नमस्कृता॥ इडा नाम्नी तु या नाडी वाममार्गे व्यवस्थिता॥१२५॥ मध्यनाडीं समाश्लिष्य वामना
सापुटं गता॥ पिंगला नाम या नाडी दक्षमार्गे व्यवस्थिता॥१२६॥ सुषुम्नां सा समाश्लिष्य दक्षनासापुटं

...गर्भस्तंभनं तंडुलीमूलं तोयेन राजवृक्षतंडुलं वा पिबेत् ३ धूपितो योनिरं
...मीनमांसं वा काष्ठेन धूम्रकेन तु अस्तं ते दीपने तं त्र्यः गर्भं... विवर्जिता ४ अथ मंत्रः
ॐ नमो विघ्नहराय गर्भस्तंभनं कुरु कुरु स्वाहा इति श्रीदत्तात्रेयतंत्रे ईश्वरदत्तात्रे
यसंवादे स्तंभनं नाम चतुर्थः पटलः ४ अथ विद्वेषणं ईश्वर उवाच विद्वेषणं नराणां
रीणां विद्वेषं राजमंत्रिभिः महाकौतुकं विद्वेषं यथा सिद्धिमुपलतः १ एकहस्ते
काकपक्षं उलूकपक्षं परकरे मंत्रयित्वा मिलतयं कृष्णसूत्रेणा बंधयेत् २ अंजलि
व जलं नैव तर्पयेत् हस्तपत्रके एवं सप्तदिनं कुर्याद् होमं दशशतं जपेत् ३ गृहीत्वा
गजकेशं च गृहीत्वा सिंहकेशकं गृहीत्वा मृत्तिकापादे पोटली निखनेद् द्वि ४
तस्योपरि स्थानं अग्न्या पक्षालतीत होमयेत् विद्वेषं कुरुते तस्य नान्यथा शंकर।
गेहे ते ५ मार्जारविष्ठामादाय विष्ठामादाय मूषके पादानां मृत्तिकायुक्तं पुत्तली
म्रियते नरः ६ नीलवस्त्रेण संवेष्ट्य मंत्रयित्वा शतेन वै विद्वेषं तत्क्षणाद्भवेत्। २

द्वियोगमुदाहृतं १ उष्ट्रशोणितं गृहीत्वा तत्पत्रे परिविलिखिपेत् पक्ष्मनां भवति स्तंभः

सिद्धियोगमुदाहृतं २ अथ मनुष्यस्तंभनं गृहीत्वा रक्तमूलावष्टगोरोचनसमं १ त

त्विनं यस्यनामालिखेत् कंमे ममयोस्तंभनकारकः अथ मेघस्तंभनं शुष्ककाष्ठमा

शुष्कमशानांगारसंयुते स्थापयेत् नभसि मेघस्तंभकरं भवेत् १ अथ निद्रा

स्तंभनं मूलेहृहमामधुकं पिष्टानस्यां समाचरेत् निद्रास्तंभनमेतद्धि मूलदे १

वेन भाषितं १ अथ नौकास्तंभनं भरण्यां क्षीरकाष्ठस्य कीलं पंचांगुलं निखनेत्

नौकास्तंभनमेतद्धि मूलदेवेन भाषितं १ अथ जलस्तंभनं पद्मकं नामेदं

तत्स्मर्णीनकारयेत् वापिकूपतडागादि निक्षिपेत् बंधते जलं १ अथ मंत्रः

ॐ नमो भगवते ... जलस्तंभय २ ठः ठः १० अथ गर्भस्तंभनं एरंडबीजं ...

वार ... स्तंभन गर्भं ... मूलं ... गर्भस्तंभनकरं परं १ सिद्धार्थमूलं ... १

वारे ... मेतद्यानगर्भं धारयेत् ... नलभतेपुनः २ ... मूलचूर्णं

नसिद्धं ...

४

ॐ नमो नारायणाय अमुकं अमुकेन सह विद्वेषं कुरु कुरु स्वाहा इति श्रीदत्तात्रेयतंत्रे
ईश्वरसंवादे विद्वेषणं नाम पंचमः पटलः ५ अथ उच्चाटनं ईश्वर उवाच येन हृतं गृहं तेत्रं
कलत्रं धन पुत्रकं उच्चाटकं वयं कुर्मो उड्डीशे योगि पीयते १ ब्रह्मदंडी चिता भस्म शिव
लिंगस्य लेपयेत् स्त्रियार्थो वेष संयुक्तं श्मशान वारे क्षिपेत् गृहे २ उच्चाटनं भवेत् तस्य स्त्री
पुत्र बांधवैः सह विनामंत्रेण सिद्धिः स्यात् सिद्धियोगमुदाहृतं ३ गृहीत्वा गर्दभो धूलिः
वामपादेन निष्क्रांतं मध्याह्ने भौमवारे च यद्गृहे निक्षिपेन्नरः ४ उच्चाटनं भवेत्तस्य
जायते मरणांतकं विनामंत्रेण सिद्धिः स्यात् सिद्धियोगमुदाहृतं ५ स्त्रियाः केशं शिवनि
र्माल्यं यद्गृहे निखनेन्नरः उच्चाटनं भवेत्तस्य उक्तं च पुनः स्मृतौ ६ काकपक्षे रवि
वारे यद्गृहे निखनेन्नरः उच्चाटनं भवेत्तस्य नान्यथा शंकरोदितं ७ उलूकपक्षे कुज
वारे यद्गृहे निखनेन्नरः उच्चाटनं भवेत्तस्य विनामंत्रेण सिद्ध्यति ८ उलूकविष्ठा गृही
त्वा स्त्रियाः केशसह संयुतं यस्यांगे निक्षिपेच्चूर्णं सप्त उच्चाटनं करं ९ गृहीत्वा — उच्चैः

...तातपुत्रकौ ७ गृहीत्वा सर्पदंतस्य गृहीत्वा वभ्रुरोमकं चितास्मस्मसमापुत्रकंग्र
हिकाकारयेन्नरः ८ उद्याने निखनेद्भूमौ अंत्यपितास्मनामकः विद्वेषतन्नत्वाश्र
त्रैवनान्यथाशंकरोदितं ९ वभ्रुरोमकंजुकाहि सभायां धूपं दीयते विद्वेषंजा
यते सत्यं नान्यथाशंकरोदितं १० गृहीत्वा श्वनः रोमं च मार्जार सतथा नांत्व स
भायां दीयते धूपं विद्वेषं जायते तदा ११ गृहीत्वा मनुष्यविष्टा च सर्पदंतस्य पेषयेत
ललाटे तिलकं कृत्वा विद्वेषं जायते तत्क्षणात् १२ गृहीत्वा गजदंतं च गृहीत्वा सिंह
दंतकं पेषयेन्नवनीतेन तिलकं द्वेषकारकं १३ अष्टकेशं गृहीत्वा तु माहिषके
शसंयुतं सभायां दीयते धूपं विद्वेषो जायते तत्क्षणात् १४ गृहीत्वा श्वसिंहीकं दंतं निख
नेद्गृहद्वारतः कलहो जायते नित्यं विद्वेषो जायते तदा १५ यस्य यस्य भवेद्वैरं जीवा
जीव भवेत्तदा तस्य वाहस्तकापुतं कं या त्रयांशुसमन्वितं १६ पुत्तलीं क्रियते सम्य
क् श्मशाने निखनेद्भुवि विद्वेषं जायते सत्यं सिद्धियोगमुदाहृतं १७ अथ मंत्रः ॐ

ततस्तत्तपसेतिनिश्चितं गंधर्वकन्यापृथिव्यासापजं संभुज्यमानात्तपफलंदुरत्यय [illegible]
मासजात् १७ वाक्यात्सुराल्लोमसजातमद्भुतं श्रुत्वेतपार्थिवोप्रीतोनत्वानत्वा [illegible] वी
परयानमुक्तंपप्रच्छपुरोहितं दिलीपउवाच भगवान्ब्रूहिकंन्याभिशापाल्लब्धकथंकृतः कस्यकंन्या
ननावेष्मिकिंनाम्नाकीदृशंवय १८ कथंलोमशवाक्येनविपापाःशापतोभवन् विमुक्तास्सुत
दात्तस्मादागताःकातिसंख्यया वशिष्ठउवाच श्रूयतांराजसार्दूल धर्मवर्गापराकथा यथा
श्रीविष्णुर्गर्भोधर्मसख्ये स्मरेव १९ गंधर्वःसुमुखोलामतस्यकन्याविमोहिनी सुशीलाचसुशी
लस्यसुस्वरास्वरवेदिनः २० सुताराचंद्रकांतस्यचंद्रकासुप्रभस्यतु इमानिवरत्नामानितासाम
स्परसांतप २१ कुमार्यःपंचसप्राप्ताःवयसाचसमापुनः रूपयौवनगांभीर्यवयसात्तुल्यमो
हिता २२ शोभेतेचयथाभन्योमियत्ताश्चसखीहृता चंद्रादिविविनिःक्रांताः चंद्रकेवसमुज्व
ला २३ चंद्राननासुकेशिन्याःपद्मवक्त्रासुखप्रदा नेत्रयोनंदकारिण्यःइवमाधवे २४ उन्नी
लयौवनांकांतावल्लीवनवपपल्लवैः हिमगोस्तथाहेमाभाहेमालंकारभूषि २५ हेमचंपकमा
लिन्याहेमसूक्ष्मविमुवाससः स्वरग्रामावलीडास्तुविविधामूर्छनास्तच २६ नानागानविनोदे